# Narayanakritam Rudra Stotram

# નારાયણકૃતં રુદ્રસ્તોત્રમ્

## Document Information

Text title : Narayanakritam Rudra Stotram

File name : nArAyaNakRRitaMrudrastotram.itx

Category : shiva, mahAbhArata, stotra

Location : doc_shiva

Proofread by : PSA Easwaran

Description/comments : mahAbhArata | droNaparva | adhyAya 172/66-73||

Latest update : November 15, 2025

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

November 15, 2025

*sanskritdocuments.org*

# નારાયણકૃતં રુદ્રસ્તોત્રમ્

ત્વત્સમ્ભૂતા ભૂતકૃતો વરેણ્ય ગોપ્તારોઽદ્ય ભુવનં પૂર્વદેવાઃ ।
આવિશ્યેમાં ધરણીં યેઽભ્યરક્ષન્પુરા પુરાણાં તવ દેવ સૃષ્ટિમ્ ॥ ૬૬॥

સુરાસુરાન્નાગરક્ષઃપિશાચાન્નરાન્સુપર્ણાનથ ગન્ધર્વયક્ષાન્ ।
પૃથગ્વિધાન્ભૂતસઙ્ઘાંશ્ચ વિશ્વાંસ્ત્વત્સમ્ભૂતાન્વિદ્મ સર્વાંસ્તથૈવ ।
ઐન્દ્રં યામ્યં વારુણં વૈત્તપાલ્યં મૈત્રં ત્વાષ્ટ્રં કર્મ સૌમ્યં ચ તુભ્યમ્ ॥ ૬૭॥

રૂપં જ્યોતિઃ શબ્દ આકાશવાયુઃ સ્પર્શઃ સ્વાદ્યં સલિલં ગન્ધ ઉર્વી ।
કામો બ્રહ્મા બ્રહ્મ ચ બ્રાહ્મણાશ્ચ ત્વત્સમ્ભૂતં સ્થાસ્નુ ચરિષ્ણુ ચેદમ્ ॥ ૬૮॥

અદ્ભ્યઃ સ્તોકા યાન્તિ યથા પૃથક્ત્વં તાભિશ્ચૈક્યં સઙ્ક્ષયે યાન્તિ ભૂયઃ ।
એવં વિદ્વાન્પ્રભવં ચાપ્યયં ચ હિત્વા ભૂતાનાં તત્ર સાયુજ્યમેતિ ॥ ૬૯॥

દિવ્યાવૃતૌ માનસૌ દ્વૌ સુપર્ણાવવાવશાખઃ પિપ્પલઃ સપ્ત ગોપાઃ ।
દશાપ્યન્યે યે પુરં ધારયન્તિ ત્વયા સૃષ્ટાસ્તે હિ તેભ્યઃ પરસ્ત્વમ્ ॥ ૭૦॥

ભૂતં ભવ્યં ભવિતા ચાપ્યધૃષ્યં ત્વત્સમ્ભૂતા ભુવનાનીહ વિશ્વા ।
ભક્તં ચ માં ભજમાનં ભજસ્વ મા રીરિષો મામહિતાહિતેન ।
આત્માનં ત્વામાત્મનોઽનન્યભાવો વિદ્વાનેવં ગચ્છતિ બ્રહ્મ શુક્રમ્ ॥ ૭૧॥

અસ્તૌષં ત્વાં તવ સમ્માનમિચ્છન્વિચિન્વન્વૈ સવૃષં દેવવર્ય ।
સુદુર્લભાન્દેહિ વરાન્મમેષ્ટાનભિષ્ટુતઃ પ્રતિકાર્ષીશ્ચ મા મામ્ ॥ ૭૨॥

તસ્મૈ વરાનચિન્ત્યાત્મા નીલકણ્ઠઃ પિનાકધૃક્ ।
અર્હતે દેવમુખ્યાય પ્રાયચ્છદૃષિસંસ્તુતઃ ॥ ૭૩॥

ઇતિ મહાભારતે દ્રોણપર્વણિ ૧૭૨ અધ્યાયાન્તર્ગતં
નારાયણકૃતં રુદ્રસ્તોત્રં સમ્પૂર્ણમ્ ।

મહાભારત । દ્રોણપર્વ । અધ્યાય ૧૭૨/૬૬-૭૩॥

mahAbhArata . droNaparva . adhyAya 172/66-73..

Proofread by PSA Easwaran

*Narayanakritam Rudra Stotram*

pdf was typeset on November 15, 2025

Please send corrections to *sanskrit@cheerful.com*